श्रियै नमः ।

श्रीअयोध्यानिवासि श्रीबलरामाचार्यसङ्गृहीतः

एकादशीनिर्णयः ।

श्रीबलरामाचार्यचरणाश्रित—विद्यारत्न—तर्कभूषण
रामप्रपन्नाचार्यशास्त्रिणा पाठभेद-
टिप्पण्यादिद्वारा संस्कृत्य

असिस्टेन्ट एकाउन्टेन्ट जनरेल एम. ए.
शचिन्द्रचन्द्रगुप्तसेनस्य द्रव्यसहायेन
वृन्दावनस्थ 'श्रीनिवास' यन्त्रालये
मुद्रापितो विजयते ।

सम्वत् १९७४]   [रामानुजवत्सर ९०१

भूमिका ।

अयि महाभागाः ।

श्रीमद्भिर्महर्षिभिः श्रुतिस्मृत्युदितमवश्यानुष्ठेयं व्रता-दिकं चतुर्णां वर्णानां पृथक् पृथक् निरणायि, तेषु च व्रतेषु एकादशीव्रताचरणं मोक्षफलप्रदतया सर्वजनानाम-प्युपादेयं भवति । तच्च साम्प्रदायिकैर्निबन्धनग्रन्थैर्भिन्नभिन्नत-थाप्रतिपाद्यते, तत्तत्सम्प्रदायमनतिलङ्घ्यैवानुष्ठीयते च सर्वैः । तत्र विशिष्टाद्वैतानुयायिनस्तूषः कालीन दशमीविद्धैकादशीं परित्यजन्ति । तादृशव्रतानुष्ठाने सप्रपञ्चं सप्रमाणं सयु-क्तिकं श्रीमद्वीरराघवाचार्यनिर्मितमेकं ग्रन्थरत्नं— न्यायमा-र्तण्ड उभयवेदान्तप्रवर्तकाचार्य शास्त्री श्रीसुदर्शनाचार्यैरयो-ध्यावासिभागवतरत्नबलरामाचार्याभ्यर्थनया तेभ्यः प्रसा-दितम्. ते च बलरामस्वामिनोऽशुद्धिबहुलं तत्र तत्र गलि-तग्रन्थमप्येतत्पुस्तकं यथामति संशोध्य ग्रथलोपभीत्या यथातथं मुद्रापयितुं मामाज्ञापितवन्तः । तन्नियोगेनैतत्प्र-काशयितरि मयि प्रकाशितकरुणा ये निर्मत्सरा महान्त

एतद्ग्रन्थं सम्यक् परिष्कृत्यानुगृह्णीयुस्तेषां महोपकारमवतं-सीकृत्य द्वितीयावृत्तौ सम्यक् परिष्कृतं प्रकाशयामः। ग्रन्थलाभमात्रणैवेदानीं सन्तुष्टमना भवन्तु तत्रभवन्तो भवन्तः।

इति निवेदयति प्रपन्नपदपरागः—

रामप्रपन्नाचार्यः

॥ श्रीमते रामानुजाय नमः ॥

एकादशीनिर्णयः ।

एकादशीनिर्णय उच्यते; तत्र च भगवच्छास्त्रम्- 'पञ्च-पञ्चाशदधिका नवपञ्चविनाडिका । दशमीचेन्न वेधः स्यात्तदूर्ध्वं वेध उच्यते । विनाड्येकोनषट्पञ्च घटिका दशमी यदि । न वेधः स्यात्तदूर्ध्वं वै दशमीवेध उच्यते" इति ।

ततश्चारुणोदयवेधस्सूर्योदयवेध इति द्विविध एव वेधः । अत्रारुणोदयवेधश्चतुर्विधः, ब्रह्माण्डे "षट्पञ्चाशद्घटिकान्ते चतस्रो घटिकास्तु याः । अरुणोदय इत्याहुः तत्र वेधाश्चतु-र्विधाः । वेधातिवेधौ विज्ञेयौ महावेधस्तृतीयकः । चतुर्थस्तु तथा प्रोक्तो योगस्सूर्योदये मतः" ब्राह्मे "वेधश्चैवातिवेधश्च महा-वेधस्तथैवच । योगवेधश्च चत्वारः उपवासस्य दूषकाः" इति । अत्र वेधातिवेधमहावेधयोगवेधानाञ्चतुर्णामपि परिमाणमुक्तं ब्रह्मवैवर्त्ते 'चतस्रो घटिकाः प्रातः अरुणोदयनिश्चयः । चतुष्टयविभागोऽत्र वेधादीनां किलोदितः । अरुणोदयवेधः

स्यात् सार्द्धन्तु घटिकात्रयम् । अतिवेधो द्विघटिकः प्रभासन्दर्शनाद्रवेः । महावेधोपि तत्रैव दृश्यतेऽर्को न दृश्यते । तुरीयस्तत्र विहितो योगस्सूर्य्योदये सति"। अत्रैषा योजना, प्रभासन्दर्शनादर्वाक् सार्द्धघटिकात्रययुक्ता द्विघटिका चेदतिवेधः, तत्रैव द्विघटिकायामेव यत्रार्को न दृश्यते तत्र दशमीयोगो महावेधः, एकादश्यान्वितं प्रातर्घटिकाश्चाह ब्रह्माण्डे– प्रभासन्दर्शनात् पूर्वं सार्द्धन्तु घटिकायामेव यत्रार्को न दृश्येत दशमीयोगो महावेधः 'एकादश्यान्वितं प्रातर्घटिकैकोऽरुणोदये । दशमी दृश्यते वेधो न वेधस्तु न दृश्यते । महावेधन्तु तं विद्यात् सूर्य्यमण्डलदर्शने । दशमी-दृश्यते सा तु वेध इत्युच्यते बुधैः" इति । अयमत्र विवेकः– प्रभासन्दर्शनं सूर्य्योदयानन्तरम्. अर्धघटिकायामिति तेन सह एकादश्यां त्रिघटिकानुप्रवेशवेधः, ततः प्रथमघटिकायां वेध इत्युक्तं भवति । घटिकैकादशी दृश्यते इति तु प्रथम-घटिकायां कियन्मात्रान्वयेपि वेध इति सूचनार्थम्, उदयश्च कृत्स्नमण्डलदर्शनम्, तच्च पञ्चमघटिकाप्रारम्भ कालः, ततश्च घटिकाद्वयदशमीव्याप्तिरतिवेध इति, सूर्य्यदर्शनञ्चतुर्थोत्तरार्ध इति पूर्वार्धे दशमी न दृश्यते परन्तु द्वितीयघटिकायामेव

दृश्यते चेदित्यर्थः । ततश्च तृतीयघटिकायां दशमीव्याप्तिर्महावेध इति सकलमण्डलदर्शनस्य चतुर्थघटिकाकालत्वाच्चतुर्थघटिकाव्याप्तिर्योग इत्युक्तं भवति । ब्रह्माण्डे " सप्तपञ्चाशद्घटिका यदा स्याद्दशमी तदा । वेधसंज्ञस्तु वै प्रोक्तः राक्षसानां फलप्रदः । अष्टपञ्चाशद्घटिका यदा स्याद्दशमी तदा । अतिवेधस्तु वै प्रोक्तः जम्भासुरफलप्रदः । एकोनषष्टिघटिका दशमी तु यदा भवेत् । महावेधो हि सम्प्राप्तो बाष्कलेर्बलवर्द्धनः । यदा वै षष्ठिघटिका सम्पूर्णा दशमी भवेत् । योगो नाम महावेधो मोहिन्यास्सकलेष्टदः " उदयोत्तरवेधोपि तत्रैवोक्तः " उदयोपरि विद्धा तु दशमी तु यदा भवेत् । दानवेभ्यः प्रीणनार्थं दत्तवान् पाकशासनः । ब्रह्मपुराणे— पञ्चचत्वारिंशः स्पर्शः सङ्गः पञ्चाशता मतः । पञ्चपञ्चाशता सत्यो वेधः षष्ठ्या मतो बुधैः । स्पर्शः कृतयुगे ज्ञेयस्त्रेतायां सङ्गसंज्ञकः । सत्यस्तु द्वापरे ज्ञेयो वेध एव कलौ युगे" अयञ्चोदयोर्द्ध्ववेधः षड्घटिकापर्य्यन्तं व्याप्नोति 'अपि षट्घटिका' मित्युक्त्वा 'सदा तां परिवर्जयेत्' इतिवचनात् ततश्च वेधातिवेधमहावेधयोगवेधोदयोर्द्ध्ववेध इति सिद्धम् । नन्वत्र वेधाख्यारुणोदयप्रथमघटिकावेधस्यैव

दोषत्वकथने तदुत्तरेषामतिवेधादीनां दुष्टत्वं किम्पुनर्न्याय-
सिद्धमिति वेधभेदकथने वैयर्थ्यमितिचेत्. सत्यम्; भेद-
कथनस्य वेधातिवेधादीनाम् उत्तरोत्तरं दोषाधिक्य-
प्रदर्शनार्थत्वेन सार्थकत्वात् तत्प्रदर्शनञ्च दिनक्षयाद्युपाधिना
समीचीनकालान्तराभावेऽगत्या प्रथमाद्वा विद्धास्वीकारे प्राय-
श्चित्तानुष्ठानार्थं तदनुरूपप्रायश्चित्तानुष्ठानञ्च तारतम्यज्ञानं
न सम्भवति, अत्र दोषतारतम्यञ्च तत्तत्कालपरिमाण-
वशात् समाख्यया चावगम्यते, प्रायश्चित्तं तु स्मृत्यन्तरोक्तं
'दशमीशेषसंयुक्ता नतु कार्य्या कथञ्चन। जम्भस्येयं पुरा दत्ता
दशमीशेषसंयुता । उपोषित्वा प्रमादेन प्रायश्चितं द्विज-
श्चरेत्। प्रायश्चित्तमकुर्वाणः तत्फलेन विनाशितः। स ग-
च्छत्यन्धतामिस्रं नरकं च सुदारुणम्। अज्ञानाद्यदि वा
मोहात्कुर्वन्नेकादशीव्रतम् । दशमीशेषसंयुक्तं प्रायश्चितमिदं
चरेत्। तप्तकृच्छ्रं नरः कृत्वा गां दद्याच्च सवत्सकाम्। सुव-
र्णस्यार्द्धकं देयं तिलाढकसमन्वितम्" इति। अत्र दशमी
शेषसंयुक्तेति निषेधवाक्ये संयुक्तपदश्रवणात् "उदयात्तु
प्राङ्मुहूर्त्तेन व्यापिन्येकादशी यदा। संयुक्तैकादशी नाम
वर्ज्येयं धर्मवृद्धये" इति निषेधवाक्ये द्विघटिका दशमीयुक्ता-

यास्संयुक्तैकादशीत्वाभिधानात्– ‘ अतिवेधो द्विघटिका प्रभासन्दर्शनाद्रवेः” इत्यादिनाऽतिवेधस्य द्विघटिकाव्याप्तिरूत्वात। अत्र निन्दार्थवादस्य ‘जम्भस्येयं पुरा दत्ते’तिजम्भसम्बन्धश्रवणात् ‘अतिवेधस्तु वै प्रोक्तो जम्भासुरफलप्रदः। जम्भासुरस्यातिवेधो मोहिनीवेधलेशीनी” इत्यादिषु बहुषु निन्दार्थवादेषु वेधस्य जम्भसम्बन्धश्रवणात्। “ दशम्याः प्रान्तमादाय यदोदेति दिवाकरः। तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तु” इति योगस्य जम्भासुरसम्बन्धोक्तेः। यातुधानव्रतयोगे महावेधन्तु वासकलेरिति योगस्य यातुधानसाधारणोक्तो जम्भस्यापीतरसाधारण्येन योगसम्बन्धत्वेन तदेकदेशसम्बन्धविवक्षयोपपत्तेश्चातिवेधस्यायं प्रायश्चित्त इत्यवसीयते, ततश्चोक्तप्रायश्चित्तस्य द्विघटिकादशमीव्याप्ति प्रायश्चित्तत्वे घटिकासंख्ययैव न्यूनाधिकवेधानामपि दोषतारतम्यमवगम्योक्तप्रायश्चित्त एव वायोऽहकृत्वा तत्तदनुरूपं प्रायचित्तमनुष्ठेयमितिवेधविभागस्य प्रायश्चित्तानुष्ठानार्थत्वात् सार्थत्वसिद्धिः, एवमुक्तवेधातिवेधमहावेधयोगोदयवेधाख्याः सर्वे वेधास्सकामनिष्कामयतिगृहिविशेषानादरेणनित्यकाम्यव्रतविशेषानादरेण सर्वेपि सर्वैर्व्रतद्वयेपि त्याज्या भवन्ति। नारदीये “लववेधेऽपि

विप्रेन्द्र दशम्येकादशीं त्यज्येत् । सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव निर्मलम्" स्कान्दे "कलाकाष्ठादिगत्यैव दृश्यते दशमी विभो । एकादश्यां न कर्तव्यं व्रतं राजन् कदाचन" स्मृत्यन्तरे "कलार्द्धेनापि विद्धा स्याद्दशम्येकादशी यदि । तदाप्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् । तथा 'एकादशी दशम्या तु सप्तम्या चाष्टमी युता । पञ्चम्या च तदा षष्ठी त्रयोदश्या चतुर्दशी । आसु क्रियां न कुर्वीत पूर्वविद्धासु मानवः' पैठीनसिः- "एकादशी तथा षष्ठी अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्वैर्न संयुताः" स्कान्दे "एवं नन्दा न कर्त्तव्या दशमीसंयुता विभो । कलाकाष्ठापि या चेयं दृश्यते दशमी विभो । एकादश्यान्तु सेनानि कर्त्तव्या न कथञ्चन" पाद्मे 'कलार्द्धेनापि विद्धां तु दशम्येकादशीं त्यज्येत् । सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव निर्मलम् । श्वलीढं पञ्चगव्यं च दशमीदूषितां त्यज्येत् । एकादशीं द्विजश्रेष्ठ पक्षयोरुभयोरपि" नारदीये "कलान्वयेऽपि विप्रेन्द्र दशम्येकादशीं त्यजेत् । सुराया बिन्दुना स्पृष्टं गङ्गाम्भ इव दूष्यति । दशम्येकादशी चैवदिशा विद्धा भवेद्यदा । तदा त्याज्या विशेषेण गङ्गाम्भः श्वदृतौ यथा । यथा भवेत्परित्याज्यं सुराबिन्दुयुतं पयः ।

तथैव दशमीविद्धा त्याज्या एकादशी स्मृता"। अथात्र निन्दार्थवादा अपि दृश्यन्ते "दश्यम्या यस्तु विद्धायामेकादश्यामुपोषितः। तस्यायुः क्षीयते सत्यं नारदोऽयं ब्रवीत्पदः" विष्णुः "दशम्येकादशी यत्र तत्र नोपवसेद्बुधः। अपत्यानि विनश्यन्ति स्वर्गञ्चैव न गच्छति। सत्यं सत्यं विनश्येत सन्ततिस्तु न चान्यथा। दशम्यानुगता यत्र तिथिरेकादशी भवेत्। तत्रापत्यविनाशः स्यात्परेत्य नरकं व्रजेत्" पुराणे पूर्णाविद्धां कलार्द्धेन नन्दा पूर्णामपि त्यजेत्। यदीच्छेदात्मसन्तानं चतुर्षु निरयेष्वपि। नचैवोपोसितव्यञ्च नैकभुक्तमयाचितम्। नन्दायां पूर्वविद्धयां कुर्य्यादैश्वर्य्यमीहता। एकादशीमुपोष्यात्- अप्रच्छेदशमीयुतां दशमीमिश्रिता हन्ति व्रतमेकादशीकृतम्" नारदः दशम्या सञ्जाता यत्र तिथिरेकादशी भवेत्। पुत्रापत्यविनाशश्च परेत्य नरकं व्रजेत्। अरुणोदयवेलायां विद्धा काचिदुपोषिता। तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्। रुगदः "पूर्वविद्धां प्रकुर्वाणो नरो धर्मं न क्रामति। सन्ततेश्च विनाशाय सम्पदो हरणायच। दशमीशेषसंयुक्ता गान्धार्य्या समुपोषिता। तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्ज्जयेत्" गारुडे

"विद्धामेकादशीं विप्र त्यजन्ते तां मनिषिणः ; तस्यामुपोषितो याति दारिद्र्यं दुःखमेव च । दशम्येकादशी विप्र सुरैश्वर्य्यविनाशिका" इतिहासोत्तमे "दशम्यनुगता विप्र नोपोष्या सा कुलोपहा' पाद्मे 'उपोष्यैकादशीं मोहाद्दशमीशेषसंयुताम् । नरः परे स्वमते इह लोके परत्र च धृतराष्ट्रेण । मैत्रेयः 'यदर्थेन वियोगोभूत् पुत्राणां भार्यया सह । पूर्वमेतत्सभार्य्येण दशमीशेषसंयुता । कृता चैकादशी राजन् तस्येदं कारणम्मतम् । नचाहं स्वैरिणी भार्य्या नचाहमपतिव्रता । न चेह कलुषं किञ्चित् किं पापं त्वन्यजन्मनि रामपत्न्यावचः श्रुत्वा वाल्मीकिर्ऋषिपुङ्गवः । चिरं ध्यात्वा महाराज तामुवाचेदृशं वचः । दशम्येकादशी सम्यक् समुपोष्य जनार्द्दनः । अभ्यर्चितस्त्वया देवि तस्येदं कर्मणः फलम् । वसिष्ठस्तामुवाचेदं पृष्टो मांधातृभार्य्यया । एकादशी पुरा चैव विद्धा चोपोषिता त्वया । तेन ते कर्मणा चैव समस्तसुतबान्धवैः । वियोगं समनुप्रप्ता सम्यक् विद्धि पतिव्रते" इति 'यानि कानि च पापानि त्रैलोक्ये सम्भवति हि । तेषां स्थानं दशम्या वै विद्धा चैकादशी मता । सप्तजन्मकृतं पुण्यं नश्येत्तत्र न संशयः'' रुक्मांगदः 'पतन्ति नरके घोरे विद्धायां समुपोष-

णात्। सप्तजन्मकृतं पुण्यं निर्दह्यनरकं व्रजेत्। यैः कृता दशमीविद्धा विद्यामोहेन मानवैः। ते गता नरकं घोरं युगान्येकोनसप्ततिः" कार्ष्णायनिः "भूतविद्धा अमावस्या दशम्यैकादशीयुता। दिशाविद्धा तु सामग्र्यं हन्ति पुण्यं पुराकृतम्" नारदः 'विद्धा हन्ति पुरा पुण्यं यथा श्राद्धं हि माहिषम्। स्नानं दत्तं हुतं जप्तं तथा पूजा कृता हरेः। दशमीशेषसंयुक्तामुपोष्यैकादशीफलात्। संवत्सरकृतात् जन्तुस्सपुण्याच्च प्रमुच्यते कौर्मे "दशमीशेषसंयुक्तामुपोष्यैकादशीं किल। संवत्सरकृतेनेह नरो धर्मेण मुच्यते" नारदः "नोपोष्या दशमीविद्धा सदैवैकादशी तिथिः। तामुपोष्य नरो जह्यात् पुण्यं वर्षशतोद्भवम्" स्कान्दे 'अष्टमी सप्तमीविद्धा रोहिणी कृत्तिकान्विता। दशम्येकादशी विद्धा हन्ति पुण्यं पुरातनम्। दशम्यनुगता हन्ति द्वादश द्वादशीफलम्। धर्मापत्ययनञ्चात्र त्रयोदश्यान्तु पारणम्, कौर्मे 'द्वादश द्वादशी हन्ति पूर्वविद्धा उपोषिता। तस्मात्सर्वप्रयत्नेन पूर्वविद्धां परित्यजेत्"– ब्रह्मवैवर्ते 'दशमीशेषसंयुक्ता यः करोति स मूढधीः। एकादशीफलं तस्य न स्याद्द्वादशवार्षिकम्" इति अत्र यद्यपि सनिन्दार्थवादेषु निषेधेषु विद्धाविशेषाश्रवणात्

अधिकारिविशेषाश्रवणात् सर्ववेधपरत्वं सर्वाधिकारीविषयत्वं व्रतद्वयविषयत्वञ्चावसीयते तथाप्यते निषेधाः काम्यव्रतानुष्ठातृसकामनिष्कामाभ्यां नित्यव्रतानुष्ठातृवैष्णवेन च त्याज्ये अरुणोदयवेधनित्यव्रतानुष्ठातृवैष्णवत्याज्यस्सूर्य्योदयवेधे च पर्य्यवस्यंति, अरुणोदयवेधस्य सकामनिष्कामवैष्णवान् प्रति विशिष्य निषिद्धत्वात् सूर्य्योदयवेधस्य केवलप्रत्यवायानिवृत्त्यर्थत्वेन नित्यव्रतानुष्ठातृकवैष्णवं प्रति विशिष्य निषिद्धत्वाच्च तथाहि, स कामेतावत् ब्रह्मवैवर्त्ते अरुणोदयवेधं प्रकृत्योक्तम् 'तिथिस्सशल्या परिवर्जनीया धर्मार्थकामेप्सुवुधैर्मनुष्यैः । विहीनशल्यापि विवर्जनीया यदाग्रतो वृद्धिमुपैति पक्षः" भविष्यत्पुराणे "अरुणोदय काले तु दशमी यदि दृश्यते । न तत्रैकादशी कार्य्या धर्मकामार्थनाशनी" इति । मुमुक्षुविषये— 'उदयात्प्राक् त्रिघटिका व्यापिन्येकादशी यदि । संदिग्धैकादशीनाम वर्ज्येयं धर्मकांक्षिभिः । पुत्रराज्यसमृद्ध्यर्थं द्वादश्यामुपवासयेत् । तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणे । उदयात् प्राङ्मुहूर्तेन व्यापिन्येकादशी यदि । संयुक्तैकादशी नाम वर्ज्जयेद्धर्मवृद्धये । पुत्रपौत्रप्रवृद्ध्यर्थं द्वादश्यामुपवासयेत् ।

तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तुपारणे आदित्योदयवेलायामारब्धा षष्ठिनाडिका । सङ्कीर्णैकादशी नाम त्याज्या धर्मफलेप्सुभिः । पुत्रपौत्रप्रवृद्धयर्थं द्वादश्यामुपवासयेत् । तत्रक्रतुशतं पुण्यं त्रयोदश्यान्तुपारणम् "। तत्र त्रयोदशीपारणस्य सकामं प्रति निषिद्धत्वात् एतद्ववचनस्य मुमुक्षुविषयत्वमवसीयते । नच पुत्रपौत्रपुण्यादिश्रवणानुपपत्तिः पुत्राणामानुषंगिकफलत्वोपपत्तिः पुण्यस्य धर्मेण पापमपनुदतीतिपापनाशफलत्वेन प्रधानोद्देश्यत्वसंभवाच्च ब्रह्माण्डे "अरुणोदयवेलायांदशमीकलयापिच । त्याज्या मुमुक्षुभिर्नित्यं सुरामिश्रोदकं यथा" भरद्वाजः— 'निष्कामो यदि विद्धायामेकादश्यामुपोषणम् । कुर्य्याद्विष्णुपदं नैव प्राप्नोत्यज्ञानमोहितः" तथा वैष्णवविषये च विशेषनिषेधः, गारुडे 'दशमीशेषसंयुक्तो यदा स्यादरुणोदयः । नैवोपोष्यं वैष्णवेन तद्वदेकाशीव्रतम्' । इति एवं अरुणोदयवेधस्य सकामनिष्कामवैष्णवरूपाधिकारित्रयपरत्वे सिद्धे यानि सामान्यतोऽरुणोदयनिषेधकानि वचनानि निन्दार्थबादानि च तान्यप्युक्ताधिकारित्रयविषयाणि, तानि भविष्यत्पुराणे 'अरुणोदयवेलायां दिशासन्धिर्भवेद्यदि । प्रदुष्टं तत्प्रयत्नेन वर्ज्जनीयं नराधिप" नारदो-

ऽपि "अरुणोदयवेलायां दशमी यदि दृश्यते। मदिराबिन्दुसंमिश्रं गङ्गाम्भ इव सन्त्यजेत्" ब्रह्मवैवर्त्ते 'अरुणोदयवेलायां या स्तोकापि तिथिर्भवेत्। पूर्णा इत्येव विज्ञेया प्रभूतानोदयं विना। तत्र चेद्दशमीवेधोऽतिवेधो वापि जायते। महावेधोऽथवा योगो रक्षसां तत्फलं भवेत्। तदेतद्दशमीशल्यं सन्त्याज्यं द्वादशीदिने। षडहं शोधयित्वा तु सम्यक् रुद्राद्य कोविदैः" निन्दार्थवादा अपि भविष्यत्पुराणे 'अरुणोदयकालेषु दशमी यदि दृश्यते। सा विद्धैकादशी तत्र पापमूलमुपोषणम्" गोभिलः 'अरुणोदयवेलायां दशमी यदि दृश्यते। सम्पृक्तैकादशीं तां तु मोहिन्यै दत्तवान्प्रभुः" ब्रह्मवैवर्त्ते 'यातुधानव्रतं योगो महावेधन्तु बाष्कलेः। जम्भासुरस्यातिवेधो मोहिनी वेधलेशिनी"। स्मृत्यन्तरे 'दशम्याः प्रान्तमादाय यदोदेति दिवाकरः। तेन स्पृष्टं हरिदिनं दत्तं जम्भासुराय तु ब्रह्माण्डे 'वेधसंज्ञस्तु वै प्रोक्तो राक्षसानां फलप्रदः। अतिवेधस्तु वै प्रोक्तो जम्भासुरफलप्रदः। महावेधोपि सम्प्राप्तो बाष्कलेर्बलवर्द्धनः। योगो नाम महावेधो मोहिन्यास्सकलेष्टदः" तथा 'अरुणोदयकाले तु दशमी यदि दृश्यते। पापमूलं सदाज्ञेयं

पापमूलमुपोषणम् । अरुणोदयवेलायां विद्धा कचिदुपोषिता । तस्याः पुत्रशतं नष्टं तस्मात्तां परिवर्जयेत्' नारदीये "दत्तं मोहिनि ते स्थानं प्रत्यूषसमयात्मकम् । दृष्टं भवत्या सार्द्धैव दशम्याः प्रान्तसंज्ञितम् । अप्रार्थितमिदं सर्वं तव पद्मासनात्मजे । विबुधैस्सुकृतं सुभ्रु तवैवोपयिकन्त्विदम् । अस्मिंस्थितायां त्वयि माधवस्य पूजां करिष्यन्ति हि ये मनुष्याः । सुसन्नपूतं हि समस्तमेतत् सर्वं च संमोहिनि ते प्रदत्तम् । सूर्योदयविहीनं हि दशम्याः प्रान्तभाजनम् । पद्मनामदिनां सन्तन्तत्रार्द्धञ्च फलन्तव' इत्यादि । एवमरुणोदयवेधस्य सामान्यतो विशेषतश्च निषेधानां सकामनिष्कामविषयत्वं नित्यव्रतानुष्ठातृ वैष्णवविषयत्वञ्च सिद्धम्, एवं सूर्योदयान्तरवेधस्यापि नित्यव्रतानुष्ठातृवैष्णवविषयत्वं तद्विशेषनिषेधवाक्यवशादवगम्यते । स्मृत्यन्तरे "अतिवेधोमहावेधो ये वेधा स्मृतिषु स्मृताः । सर्वेप्यवेधा विज्ञेया वेधसूर्योदये मतः" इति । अत्र अरुणोदयवेधस्य सकाममुमुक्षुवैखानसाद्यागमोक्तदीक्षायुक्तवैष्णवविषयत्वस्य वचनसिद्धत्वात् प्रत्यवायपरिहारमात्रार्थिनो वैष्णवेतरस्य च परिशिष्टत्वात् नित्यव्रतस्य फलाभावेनारुणोदयवेधे-

पि कृतनित्यव्रतस्य मोहिनिभागित्वानुपपत्तेश्चोदयानन्तरवेधो नित्यव्रतानुष्ठात्रवैष्णवविषय एव भवति । यत्तु 'उदयोपरि विद्धा तु दशमी च यदा भवेत् । दानवेभ्यः प्रीणनार्थं दत्तवान् पाकशासनः' इति तत्काम्यव्रततत्काम्यवित् विषयम्, एवमरुणोदयवेधस्य सकामानिष्कामप्रत्यवायनिवृत्त्यर्थी वैष्णवविषयत्वं सूर्योदयवेधस्य प्रत्यवायनिवृत्तिमात्रार्थ्यवैष्णवविषयत्वञ्च सिद्धम्. एवं वेधे निरूपिते नित्यव्रते ग्राह्याग्राह्यतिथिर्निरूप्यते । तत्रैकादशी पञ्चविधा अधिकैकादशीयुक्ता अधिकद्वादशीयुक्ता दशमीयुक्ता नवमीयुक्ता उक्तसम्बन्धरहिताचेति. तत्र पञ्चमायां पूर्वत्रोपवासः प्रथमद्वितीयतृतीय चतुर्थेषु परत्रोपवासः। आद्यायां तावत् 'सर्वत्रैकादशी ग्राह्या द्वादशीमिश्रिता नरैः ।प्रातर्भवतु वा मा वा यतो नित्यमुपोषणम्' इति । द्वितीयायां नारदीये सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा। सर्वैरेवोत्तरा कार्य्या पुरुतो द्वादशी यदि इति, सर्वैर्नित्यव्रतानुष्ठातृभिरपीत्यर्थः । एकादशी भवेत् पूर्णा सद्दशा चोत्तरा भवेत् । पूर्वातु पूर्ववत् ज्ञेया तिथिवृद्धिः प्रशस्यते' इति । तृतीयायां 'तस्मान्न विद्धा शुद्धा हि कर्त्तव्यैकादशी सदा' इति । 'विद्धां परित्यजेन्नित्यं शुद्धामुपवसेन्नरः' स्कान्दे कलाकाष्ठादि-

गत्यैव दृश्यते दशमी विभो । एकादश्यां व्रतं राजन्न कर्त्तव्यं कदाचन । एकादशीमुपवसेत द्वादशीमथवापि ताम् । विमिश्रां वापि कुर्वीत न दशम्या युतां क्वचित्" । अत्र सदा कदाचनक्वचिच्छब्दानामसङ्कोचात् नित्यव्रतविषयत्वमपि चतुर्थ्यां नवमीसंयुतायामप्येकादश्यांद्वादश्यामेवोपवासः भगवच्छास्त्रे 'नवमी दशमीयुक्ता एकादश्यान्तु दृश्यते । उपोष्य द्वादशीं तत्र त्रयोदश्यान्तु पारणम् ।" अत्रैकादश्या दशमीवेधाभावेपि दशम्यान्तिथित्रये सति द्वादश्यामुपोषणं विधीयते दशमीरात्रिशेषैकादश्या एव प्रणाल्या नवमीसम्बन्धस्यवक्तव्यत्वात्, अन्यथातिप्रसङ्गात् । तथाच प्राह हारीतः—'नवमी कलया युक्ता यदि स्यात्पूर्ववासरे । एकादशीं तां संत्यज्य द्वादशीं समुपोषयेत्" अत्र पूर्ववासरे—एकादश्याः नवमीसम्बन्ध इति स्पष्टमेव प्रतीयते । तथान्यत्र 'प्रणाल्या तु नवम्या च दशम्या संयुतापिच । आद्यन्तयोर्दशम्याच द्वादश्या वापि संयुता । द्वादश्यान्तु त्रयोदश्यां प्रणाल्या संयुतापि च । एकादशीं परित्यज्य द्वादश्यां समुपोषणम्' इति। अत्र दशमीतिथित्रये द्वादशीतिथित्रये च । द्वादश्यामुपवास इति । स्पष्टं विधीयते, अत्र नित्यव्रते सूर्य्योदयवेध-

मात्रस्य दोषत्ववादिनामवैष्णवानां नित्यव्रतानुष्ठाने दश्यम्या नवमीसम्बन्धेपि द्वादश्यामुपवासः– बृहद्धारीतः– 'उदये नवमीकिञ्चिद्दशमी सकला यदि। उपोष्य द्वादशीं शुद्धां त्रयोदश्यान्तु पारणम्" इति। अथ काम्यव्रतानुष्ठानकालो निरूप्यते– सचाष्टादशप्रभेदकल्पनेन निरूपणीयः। इति तद्भेद उच्यते,– एकादशी द्विधा, शुद्धा विद्धा च, शुद्धा त्रिविधा– आधिक्यसमतान्यूनताभिः। साच प्रत्येकमाधिक्यादियुक्तद्वादशीभेदात्त्रिविधेति शुद्धा नवविधा, एवं विद्धापि नवविधेत्यष्टादशविधा, तत्राधिकद्वादशी शुद्धाधिका समद्वादशिका, शुद्धाधिकान्यूनद्वादशिका शुद्धसमा समद्वादशिका शुद्धसमा न्यूनद्वादशिका शुद्धसमा अधिकद्वादशिका शुद्धन्यूनासमद्वादशिका शुद्धन्यूनान्यूनद्वादशिका शुद्धन्यूनेतिशुद्धा नवविधा तथाविद्धापि– अधिकद्वादशिका विद्धाधिका समद्वादशिका विद्धाधिकान्यूनद्वादशिका विद्धाधिकाएकद्वादशिकाविद्धसमा समद्वादशिकाविद्धसमा न्यूनद्वादशिकाविद्धसमा अधिकद्वादशिकाविद्धन्यूनासमद्वादशिकाविद्धन्यूनान्यूनद्वादशिकाविद्धन्यूनेति विद्धापि नवविधेति। अत्राधिकद्वादशिका शुद्धाधिकायां सकाम-

निष्कामयोरपि परत्रैवोपवासः । नारदः 'सम्पूर्णैकादशी-यत्र प्रभाते पुनरेव सा । सैवैरेवोत्तरा ग्राह्या परतो द्वादशी यदि' इति । सभृगुः सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि' गारुडे— 'संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या परा पुण्यापरतो द्वादशी यदि' इति । स्मृत्यन्तरे सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा । वैष्णवी च त्रयो-दश्यां घटिकैकापि दृश्यते । [1]गृहस्थोपि परां कुर्य्यात् पूर्वां

[1] एकादशीव्रतकरणे अधिकारिणमाह निर्णयसिन्धु-कारः— अष्टवर्षाधिको मर्त्यो ह्यशीति न्यूनवत्सरः । एका-दश्यामुपवसेत्पक्षयोरुभयोरपि ॥ सपुत्रश्च सभार्यश्च सुजनो भक्तिसंयुतः । एकादश्यामुपवसेत्पक्षयोरुभयोरपि ॥ गृहस्थो ब्रह्मचारी च आहिताग्निस्तथैव च । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ यदीच्छेद्विष्णुसायुज्यं श्रियं सन्तति मात्मनः । एकादश्यां न भुञ्जीत पक्षयोरुभयोरपि ॥ एत-द्व्रतं सूतकेपि कार्यं सूतके मृतके चैव न त्याज्यं द्वादशी-व्रतम् सूतकान्ते नरः स्नात्वा पूजित्वा जनार्दनम् । दानं दत्वा विधानेन व्रतस्य फलमश्नुतः इति मात्स्योक्तेः ॥

नोपवसेत्सदा' इति । व्यासः 'एकादशी तु सम्पूर्णा त्वपरे-हनि वर्द्धते । द्वादशी वर्द्धते वा मा नैकादश्यामुपोषयेत्'' गुरुः 'संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया तु परतो द्वादशी यदि' इति । उदाहृतसामान्यव-चनानां सकामनिष्कमविषयत्वं विशेषवचनान्तरादवगम्यते. नारदः 'संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । तत्रोपोष्या द्वितीया तु पुत्रपौत्रविवर्द्धनी' वराहे 'एकादशी विष्णुना चेत् द्वादशी परतः स्थिता । उपोष्या द्वादशी तत्र यदीच्छे-त्परमं पदम् । द्वादश्येकादशी यत्र द्वादशी परतोपि वा । द्वादशीपारणं कुर्य्यात् क्रतुकोटिफलं लभेत्'' । अत्र द्वादशीयुक्तैकादश्या उपवासे मुख्यतरत्वात् त्रयोदशीयुक्त-द्वादश्याः पारणे मुख्यतरत्वादुभयोरपि परत्रोपवास उक्तः । अथ समद्वादशिकशुद्धाधिकायां सकामस्य पूर्वेद्युरुपवासः एकादश्याः पारणेऽमुख्यत्वेऽपि त्रयोदशीपारणस्य सकामं प्रति निषिद्धतया पारणे गौणकालपरिग्रह इति। अत्र नि-ष्कामस्य परेद्युरुपवासः द्वादशीयुक्त एकादश्या उपवासे मुख्यतरत्वात् त्रयोदश्याश्च द्वादशीवन्निष्कामं प्रति पारणे मुख्यत्वाच्च निष्कामस्यात्र परत एवोपवासः गारुडे 'सम्पूर्णै-

कादशी यत्र प्रभाते पुनरेव सा। त्रयोदशी उषःकाले उपोष्या तत्र का भवेत्। उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परः। सकामनिष्कामैः क्रमेणाधिकारीभेदेन द्वे तिथी उपोष्ये न त्वेकैवेत्यर्थः। तत्रैव 'उदयात् प्राग्यदा विप्र मुहूर्त्तद्वयसंयुता। संपूर्णैकादशीनाम तत्रैवोपवसेत् गृही। पुनः प्रभातसमये घटिकैका यदा भवेत्। तत्रोपवासो विहितश्चतुर्थाश्रमवासिनाम्। विधवायाश्च तत्रैव परतो द्वादशी न चेत्, गृहस्थचतुर्थाश्रमादिशब्दास्सकामनिष्कामोपलक्षकाः। कौर्मे 'सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा। उत्तमा तु यतिः कुर्य्यात् पूर्वामुपवसेद्गृही स्कान्दे 'प्रथमेऽहनि संपूर्णा व्याप्त्याऽहोरात्रमावृता। द्वादश्याद्वयदातात दृश्यते पुनरेव सा। पुर्वामुपवसेत्कामी निष्कामस्तूत्तरां प्रति विष्णुरहस्ये 'निष्कामस्तु सदा कुर्य्यादुत्तरैकादशीं सदा। सकामस्तु सदा पुर्वामिति बोधायनोऽब्रवीत्। अथ न्यूनद्वादशिका शुद्धाधिका अत्रापि सकामनिष्कामयोर्व्यवस्थयोपवासः बृहद्वसिष्ठः 'सम्पूर्णैकादशी यत्र प्रभाते पुनरेव सा। लुप्यते द्वादशी तत्र उपवासः कथं भवेत् उपोष्ये द्वे तिथी तत्र विष्णुप्रीणनतत्परैः'' ।"अत्राप्यधिकारिभेदेन पृथक पृथगेकैकमुपोष्यमित्यर्थः। वचनान्तरानुगुण्यात् विष्णुप्रीणनता-

त्पर्य्यसर्वसाधारणत्व सम्भवत्वाच्च गारुडे ‘पुनः प्रभातसमये घटिकैका यदा भवेत् । तत्रोपवासो विहितः वनस्थस्य यतेस्तथा । विधवायाश्च तत्रैव परतो द्वादशी न-चेत्”प्रचेताः ‘एकादशी तु वृद्धा चेच्छुक्लपक्षे विशेषतः । उत्तरान्तु यतिः कुर्य्यात्पूर्वामुपवसेद्गृही’ ब्राह्मे ‘शुद्धा चै-कादशी यत्र तया विद्धा तु द्वादशी । स्वर्गदोपोषिता पूर्वा उत्तरा स्वर्गमोक्षदा’ इति । अधिकद्वादशिक शुद्धसमाशुद्ध-न्यूनयोरपि सकामनिष्कामयोः पूर्वापरयोर्व्यवस्थयोपवासः । अत्र सकामस्य पूर्वत्रोपवासे उपवासपारणयोर्मुख्यकाल-लाभः, उत्तरत्रोपवासे उपवासस्य गौणकालः पारणस्य मुख्य-तरः कालः इति पक्षद्वयतौल्येऽपि प्रथमातिक्रमे कारणाभा-वात् पूर्वत्रैवोपवासः, निष्कामस्य शुद्धाया द्वादश्या अपि उप-वासे मुख्यकालत्वात् पारणमुख्यतरकाललाभाच्च परेद्युरेवो-पवास इति । अत्र सकामविषये स्कान्दे ‘न चेदेकादशी विष्णोर्द्वादशी परतः स्थिता । उपोष्यैकादशी तत्र यदीच्छे-त्परमं पदम्’ अत्रेन्द्रचतुर्मुखादिपदं विवक्षितम् । तत्रैव ‘शुद्धा-यदा समा हीना समा क्षीणाधिकोत्तरा । एकादशी मुपवसेन्न शुद्धां वैष्णवीं’मिति निष्कामविषये ब्राह्मे ‘एका तुल्या तु

संयुक्ता यदि वृद्धा परा भवेत् । अथवैकादशी नास्ति दशम्या वाप्यसंयुता । कलाथ काष्ठा द्वादश्या यदि स्यादपरेऽहनि । द्वादश द्वादशीर्हन्ति पूर्वस्यां पारणे कृते, भविष्यत्पुराणे, उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम् । निर्गतायां त्रयोदश्यां कलावा द्विकलापिवा त्रिकलायान्तु द्वादस्यां पारणं यः करोति हि । तामुपोष्य महीपाल न गर्भे विशते नरः, भागवतादितन्त्रे 'संपूर्णैकादशी त्याज्या परतो द्वादशी यदा । उपोष्या द्वादशीशुद्धा द्वादश्यामेव पारणम् । न गर्भे विशते जन्तुरित्याह भगवान् हरिः, स्मृत्यन्तरे 'संपूर्णैकादशी यत्र द्वादशी चापरेऽहनि । तत्रोपोष्या द्वादशीस्याद्द्वादश्यामेव पारणम् । स्कान्दे 'एकादशी भवेत्पूर्णा परतो द्वादशी यदि । तत्र स्वेकादशीं त्यक्त्वा द्वादश्यांसमुपोषयेत्'' पाद्मे 'विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेत् । अविद्धापि तथा विद्धा परतो द्वादशी यदि' इति समद्वादशिकशुद्धसमायां न्यूनद्वादशिकशुद्धसमायां समद्वादशिकशुद्धन्यूनायां न्यूनद्वादशीव्रतं

---

१ अत्र वेधैकादशी व्रतकरणे निर्णयसिन्धुकारोदोषमाह— अज्ञानाद्यदि वा मोहात्कुर्वन्नेकादशीं नरः । दशमीशेषसंयुतां प्रायश्चितं समाचरेत् ॥

शुद्धन्यूनायाश्च सकामनिष्कामयोरुभयोरपि पूर्वत्रोपवासः । उभयोरुभयोरुपवासे पारणे च मुख्यकालतौल्यात्. अत्र वचनञ्च 'शुद्धा यदा समा हिने'ति पूर्वोदाहृतमेव । अथाधिकद्वादशिकविद्धाधिका अत्र परत्रैवोभयोरप्युपवासः उपवासपारणयोर्मुख्यतरकाललाभस्योभयोरविशेषात् । श्रीविष्णुपुराणे 'एकादशीं दिशायुक्तां वर्द्धमाने विवर्ज्जयेत् । त्वयमार्गस्थिते सोमे कुर्वीत दशमीयुता" स्कान्दे 'एकादशी समायुक्ता याति वृद्धिं परा तिथिः । द्वादशीपारणार्थाय नोपोष्यं पूर्ववासरे" नारदः 'द्वादश्येकादशी यत्र द्वादशी परतोपि च द्वादशीपारणं कुर्य्यात् क्रतुकोटिफलं लभेत्" तत्त्व संहितायां द्वादश्येकादशी यत्र परतो न त्रयोदशी । उपोष्य द्वादशीं भक्त्या द्वादश्याञ्चैव पारणम् " अत्र सकामस्य पूर्वत्रैवोपवासः परत्रोपवासे त्रयोदशी पारणस्य तं प्रति निषिद्धत्वेनानुपपत्तेः उपवासे दशमीयुक्तैकादश्याः पारणे एकादशीयुक्तद्वादश्याश्च गौणत्वेप्यगत्या सकामैरुभयमपि स्वीक्रियते, एकादशीव्रतस्य यावज्जीवाधिकारत्वात्; अत एवोक्तं "विद्धायाश्च निषिद्धैश्च न लभ्यते दिवानि तु मुहूर्त्ताः पञ्चभिर्विद्धाः प्राप्तैवैकादशी तिथी रितित्रयोदशीपारणनिषेधश्च सर्वोपि

सकामविषयः 'एकादशीमुपोष्यैव द्वादश्यां पारणं स्मृतं त्रयोदश्यां नरः कुर्य्यात् द्वादशद्वादशीक्षयात्' विष्णुरहस्ये पारणन्तु न कर्तव्यमुपोष्यैकादशीमहः त्रयोदश्यां नरैः कार्य्यं धर्मसिद्धिमभीप्सुभिः, इति। स्मृत्यन्तरे 'दशम्या सङ्गता हन्ति द्वादशद्वादशीफलम् । धर्मापत्यधनायूंषि त्रयोदश्यान्तु पारणम्' इति 'उपोष्यैकादशीं यस्तु त्रयोदश्यान्तु पारणम्। करोति तस्य नश्यन्ति द्वादश्यो द्वादशैव तु पारणन्तु त्रयोदश्यां यः करोति नराधमः। द्वादशद्वादशीर्हन्ति नात्र कार्य्या विचारणा उदाहृतसामान्यवचनानां सकामविषयत्वं गारुडवचनादवगम्यते 'पारणन्तु 'त्रयोदश्यां न कर्तव्यं फलार्थिभि' रिति त्रयोदशीपारणस्य निष्कामविषयत्वमपि स्कान्दोक्तम् 'पारणन्तु त्रयोदश्यां निष्कामानां विमुक्तिदम्' इति। एवं त्रयोदशीपारणस्य सकामं प्रति निषिद्धत्वाद्यावज्जीवमुपवासस्याधिकारत्वादगत्याविद्धैकादशीम् एतादृशस्थले स्वीकृत्य वेधदोषपरिहारार्थं सकामैः प्रायश्चित्तमनुष्ठीयते प्रायश्चित्तप्रकारश्च वेधप्रकरणे निरूपितः तस्मात्समद्वादशिकविद्धाधिकायां सकामस्य पूर्वत्रैवोपवासः। तदुक्तं 'विद्धाप्यविद्धा विज्ञेया परतो द्वादशी न चेत् इति ऋष्यशृंगः 'सर्वत्रै-

कादशी कार्य्या दशमीमिश्रिता नरैः । प्रातर्भवतु वा मा वा यस्मान्नित्यमुपोषणम् । पारणायां न लभ्येत द्वादशी यत्र कुत्र-चित् । तदानीं दशमीविद्धाप्युपोष्यैकादशी तिथिः । अल्पापि द्वादशीविद्धा यदि न स्यात्परेऽहनि । दशमीमिश्रता कार्य्या न दोषः स्निग्धवेधतः । बृहद्वासिष्ठः द्वादशी 'स्वल्पविद्धापि यदि न स्यात्परेऽहनि । दशमीमिश्रता कार्य्या महापातक-नाशिनी । यदाऽर्कोदयमात्रापि द्वादशी ह्यपरेऽहनि । त्रयोदश्यां तदा कार्य्या दशमीशेषसंयुता त्रयोदश्यां न लभ्येत द्वादशी यदि किञ्चन उपोश्येकादशी तत्र दशमीमिश्रतापि वा ।" विष्णुरहस्ये 'दशमीशेष-संयुक्ता उपोष्यैकादशी तदा । यदा न स्यात् त्रयोदश्यां मुहूर्त्तं द्वादशी तिथिः" भविष्यत्पुराणे 'दशम्या सह संयुक्ता उपोष्यैकादशीं तदा । यदि न स्यात् परदिने द्वादशी घटिका-द्वयम् । मुहूर्त्तं द्वादशी न स्यात् त्रयोदश्यां महामुने । उपो-ष्यैकादशी मिश्रा सदैवैकादशी तिथिः । यदि न स्यात् त्रयो-दश्यां मुहूर्त्तं द्वादशी तिथिः । दशम्येकादशी युक्ता समु-पोष्या भवेत्ततः' हारितः "त्रयोदश्यां यदा न स्यात् द्वादशी घटिकाद्वयम् । दशम्यैकादशी या तु सैवोपोष्या तथा तिथिः

इति। अत्र समद्वादशिकविद्धाधिकायां निष्कामस्य परेद्युः उपवासः, उपवासे मुख्यतरकालस्य पारणे च मुख्यकालस्य लाभात्। अत्र नारदः— 'द्वादश्येकादशी यत्र संयुता त्रिदशाधिप। तामुपोष्य नरः कुर्य्यात् त्रयोदश्यन्तु पारणम्" स्कान्दे 'एकादशी कला यत्र परतो द्वादशी न चेत्। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणम्' बोधायनः 'कलाप्येकादशी यत्र परतो द्वादशी नचेत्। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणम्" तत्त्वसारसंहितायाम् 'द्वादश्येकादशी यत्र सङ्गता त्रिदशाधिप। तामुपोष्य ततः कुर्य्यात् त्रयोदश्यान्तु पारणम्" ब्राह्मे—द्वादश्येकादशी यत्र तत्र सन्निहितो हरिः। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणम्' अत्र सर्वत्र पुण्यश्रवणेपि 'धर्मेण पापमपनुदति' इतिनिष्कामस्य पुण्योद्देश्यत्वोपपत्तिरिति। अथ न्यूनद्वादशिकाविद्धाधिकायां सकामस्य पूर्वत्रोपवासः परतोपवासे निषिद्धदिनत्रयोपवासापत्तेः त्रयोदशीपारणापत्तेश्च तस्मादगत्योपवासपारणयोर्गौण कालपरिग्रह इति अत्र ऋष्यश्रृंगः एकादशी-द्वादशी च रात्रिशेषे त्रयोदशी त्र्यस्पृह गहोरात्रनापोष्यं तत्सुतार्थिभिः कौर्मे 'एकादशी द्वादशी च रात्रिशेषे त्रयो-

दशी उपवासन्न कुर्वीत पुत्रपौत्रसमन्वितः’ पाद्मे ‘एका-दशी द्वादशी च रात्रिशेषे त्रयोदशी। द्वादश द्वादशी-र्हन्ति त्रयोदश्यान्तु पारणम्’। अत्र विद्धाप्यविज्ञेया परतो द्वादशी नचे दिति सकामस्य पूर्वेद्युरुपवासः। नि-ष्कामस्य परेद्युः तदुक्तम् एकादशीदिशाविद्धा द्वादश्यां संगता यदि द्वादशीतु कला काष्ठा न भवेदपरेऽहनि त्रयोदशी रात्रिशेषे पूर्वामुपवसेद्गृही। उत्तरान्तु यतिः कुर्यात् विष्णुप्रीणनतत्परः’पाद्मे ‘द्वादशीसङ्गता यत्र भवत्ये-कादशीकला। दिनत्त्रयेपि सा पुण्या न दशम्या युता क्वचित्’ नारदिये ‘एकादशी द्वादशी च रात्रिशेषे त्रयो-दशी। त्रिभिर्मिश्रा तिथिः प्रोक्ता सर्वपापहरा स्मृता। उपवासे प्रसिद्धाया यद्येवं पूज्यते तिथिः। एकादशी द्वादशी च रात्रि-शेषे त्रयोदशी। त्रिस्पृशानाम सा प्रोक्ता ब्रह्महत्यां व्यपोहति। एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। य उपास्ते सदा भक्त्या स नरो दिवि मोदते। एकादशी द्वादशी च विशेषेण त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणम्। कौर्मे ‘एकादशी द्वादशी च रात्रिशेषे त्रयोदशी। त्रिभिर्मिश्रातिथिः प्रोक्ता सर्वपापहरा स्मृता। उपवासः

कृतस्तस्यां सर्वपातकनाशनः । एकादशी द्वादशी च रात्रिशेषे त्रयोदशी । दिनत्त्रयेपि सा पुण्या सर्वपापप्रणाशिनी’ स्कान्दे ‘द्वादशीसंयुता यत्र भवत्येकादशी तिथिः । दिनत्त्रयेपि सा पुण्या न दशम्या कदाचन । अन्यत्र ‘ एकादशी सदोपोष्या [1]महापुण्यविवर्द्धिनी’ पुराणे ‘एकादशी कलाप्येका द्वादशी सकलं दिनम् । त्रयोदशी उषःकाले वैष्णवं तद्दिनत्रयम् ’ स्कान्दे ‘एकादशी कलायुक्ता द्वादशी त्तीयते यदा । उपोष्या सर्वदा पुण्या सर्वपाप हरा तिथिः ’ सुमन्तुः एकादशीकलायुक्ता द्वादशीलुप्यते यदा । एकादशी तदोपेत्त्या द्वितीया मोत्तकांत्तिभिः ।

---

[1] देवानां च यथा विष्णुर्द्विपदां ब्राह्मणो यथा । व्रतानां च तथा राजन् प्रवरैकादशी तिथिः ॥ कुरुत्तेत्रे च यत्पुण्यं ग्रहणे चन्द्रसूर्ययो तत्सर्वं लभते यस्तु ह्येकादश्यामुपोषितः अश्वमेधस्य यज्ञस्य कारणाद्यत्फलं लभेत् । ततः शतगुणं पुण्यमेकादश्युपवासतः । गोसहस्रे च यत्पुण्यं दत्ते वेदाङ्गपारगे तस्मात्पुण्यं दशगुणमेकादश्युपवासिनाम् ॥ विष्णुधर्मः समो नास्ति गीतार्थेन धनञ्जय एकादशी समं नास्ति व्रतं नाम सनातनम् ॥

द्वादश्यान्तु यदा भूप दिनक्षयतिथिर्भवेत् तत्रोपवासः कर्त्तव्यो विष्णुसायुज्यमाप्नुयात्। एकदशी द्वादशी च रात्र्यन्ते च त्रयोदशी। उपवासः कृतस्तेषां मोक्षमेव प्रयच्छति' इति। अथाधिकद्वादशिका विद्धसमा, अत्र सकामनिष्कामयोः परत्रोपवासः, अत्र सकामस्य विद्धास्विकारे उपवासे गौणकालापत्तिः। पारणे मुख्यकालापत्तिश्चास्मा-त्परत्रोपवासे गौणकालतौल्येपि पारणे मुख्यतरकाल-लाभात् तस्यापि परत्रैवोपवासः, निष्कामस्य तु मुख्यतर-कालपारणञ्च सिध्यतीति। दशमीमिश्रता पूर्वा समावृद्धि-गता परा। उपोष्या द्वादशी तत्र न दशम्याँ युता क्वचित्" धर्मसेतुनिबन्धे 'शुद्धा विद्धा दशम्या च परतो द्वादशी यदा। तदाह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत्' व्यासः 'एकादशी यदा विद्धा दशमी कलया भवेत्। उपष्या द्वादशी तत्र यदीच्छेत्परमां गतिम्। भविष्यत्पुराणे 'उपोष्या द्वादशी शुद्धा द्वादश्यामेव पारणम्। निर्गतायां त्रयोदश्यां कलावृद्धि कलापि वा' नारदः द्वादश्यां द्वि-कलायाञ्च पारणं यः करोति हि तामुपोष्यमहीपाल न गर्भे विशते नरः' चन्द्रिका 'उपोष्या द्वादशी शुद्धा

द्वादश्यामेव पारयेत् । निर्गतायां त्रयोदश्यां कला वा द्विकलापि ' वा नारदः 'शुद्धा तु द्वादशी राजन् समुपोष्या तदा तिथिः । दशम्येकादशी मिश्रा कर्त्तव्या न कदाचन । पाद्मे दशमीगर्भिता पूर्वा लुप्यतैकादशी परा । उपोष्यैकादशी तत्र न दशम्या कथञ्चन । कलार्द्धेनापि या विद्धा द्वादश्यां पूर्ववासरः । रविचक्रार्द्धमात्रापि ततोपोष्यं परं दिनम् । उपोष्य द्वादशीं शुद्धां द्वादश्यामेव पारयेत् ' ब्रह्मवैवर्त्ते ' एकादशी द्वादशी च तत्र सन्निहतो हरिः । तेन शुद्धापि कर्त्तव्या द्वादशी फलकांक्षिभिः ।' एकादशी यदा लुप्ता द्वादशी परतो भवेत् उपोष्या द्वादशी तत्र यदीच्छेत्परमं पदम् ' इति । अत्र समद्वादशिका विद्धसमा अत्र सकामनिष्कामयोः व्यवस्थयोपवासः तत्र सकामस्य त्रयोदशीपारणं निषेधादुपवासे गौणकालपरिग्रहपारणे मुख्यकाललाभश्च निष्कामस्योपवासपारणयोर्मुख्यकाललाभ इति . एकादशीद्वादश्योरिव द्वादशीत्रयोदश्योरपितं प्रति उपवासपारणयोर्मुख्यकालत्वात् सकामविषये ऋष्य शृङ्गः ' पारणान्हे न लभ्येत द्वादशी कलयापि चेत् । तदानीं दशमीविद्धा उपोष्यैकादशी तिथिः ' पाद्मे 'विद्धा-

ण्येकादशी ग्राह्या परतो द्वादशी न चेत्। द्वादश द्वादशी-र्हन्ति त्रयोदश्यान्तु पारणम्' तत्त्वसारसंहितायाम् 'दश-म्येकादशी यत्र उपोष्या सकलापि वा। सैवोपोष्या कला-मात्रा द्वादश्याञ्च न विद्यते'' भविष्यत्पुराणे 'एकादशी दिशाविद्धा परतोपि न वर्द्धते। गृहिभिः पुत्रवद्भिश्च सैषो-पोष्या सदा तिथिः। एकादशी न लभ्येत सकला द्वादशी भवेत्। तदानीं दशमीविद्धाप्युपोष्यैकादशी तिथिः' ऋष्य शृङ्गः 'एकादशी दिशाविद्धा सकला द्वादशी भवेत्। उपोष्या द्वादशीविद्धा मुनिर्देवलकोऽब्रवीत्'' स्मृत्यन्तरे 'दशमीमिश्रिता पूर्वा द्वादश्यां यदि लुप्यते। एकादशी तदा ब्रह्मन् उपवासः कथं भवेत्। शुद्धैव द्वादशी राजन् उपोष्या मोक्षकांक्षिभिः। सकामैर्गृहिभिः पूर्वा विद्धापीति विनिश्चयः'। अत्र निष्कामविषये विष्णुरहस्ये 'दशमी मिश्रिता पूर्वा लुप्येतैकादशी परा। एकादश्यां महाप्राज्ञ उपवासः कथं भवेत्। शुद्धैव द्वादशी राजन् उपोष्या मोक्ष-कांक्षिभिः। यदा तु दशमीविद्धा भवत्येकादशी दिनम्। उपो-ष्या तु तदा शुद्धा द्वादशी मोक्षकांक्षिभिः। कौर्मे 'एका-दशी दिशाविद्धा परतो द्वादशी न चेत्। उपोष्या द्वादशी

तत्र त्रयोदश्यान्तु पारणम्'। 'स्कान्दे एकादशी दिशाविद्धा द्वादशी च न वर्द्धते । तत्रोपोष्या द्वादशी स्यात् त्रयोदश्यां तु पारणम्'' । अथ न्यूनद्वादशिका विद्धसमा अत्रापि सकामनिष्कामयोर्नित्योपवासः सकामविषये एकादशीं दिशाविद्धां वर्द्धमाने विवर्जयेत् । क्षयमार्गस्थिते सोमे कुर्वीत दशमीयुताम्'। वायुपुराणे 'एकादशी दिशाविद्धा द्वादशी च क्षयं गता । दशमीमिश्रिता तत्र उपोष्या मुनिसत्तमाः । बृहद्वसिष्ठः 'एकादशी दिशाविद्धा रात्रिशेषे त्रयोदशी । उपोष्या दशमीविद्धा मुनिरुद्दालकोऽब्रवीत्' अत्र निष्कामविषये व्यासः 'दशमीमिश्रिता पूर्वा द्वादशी यदि लुप्यते । एकादश्यां महाप्राज्ञ उपवासः कथं भवेत् । शुद्धैव द्वादशी राजन् उपोष्या मोक्षकांक्षिभिः। पारणन्तु त्रयोदश्यां पूजयित्वा जनार्दनम्, इति । अथाधिकद्वादशिकाविद्धा न्यूना, अत्र सकामस्य पुत्रव्यतिरिक्तस्य पूर्वेद्युरुपवासः । नच पूर्वत्रोपवासे गौणकालस्य पारणे मुख्यकालस्य लाभः तस्माद्वरं परेद्युरुपवासाश्रयणं तदाहि उपवासस्य गौणकालः पारणस्य मुख्यतरकालश्च लभ्येतेति विद्धैकादश्या द्वादशीसंयोगे उपवासकालस्य मुख्यतरत्वेन तस्यैवा-

ङ्गीकारात् तं मुख्यतरत्वद्वादश्यास्तुर्यात्मकत्वेन विष्णवात्मकद-शमीसंबंधमप्यसत्कृत्यस्वसम्बन्ध्येकादश्या अप्यतिशयाधायक-त्वात् तदुक्तम् 'यदि दैवात् संह्यैकादश्यान्हिनत्रयम् तत्र क्रतुशतं पुण्यं द्वादशीपारणे भवेत् इति । किंच सामान्यतोपि दिन-त्रयस्य प्रशंसा दृश्यते एकस्मिन् सावने त्वन्हि तिथीनां त्रि-तयं भवेत् । दानत्त्रयः प्रोक्तस्तत्र साहन्तिक फलमिति स्कान्दे-एकादशी दिशाविद्धा द्वादशी हन्ति किञ्चन । द्वादशी च त्रयोदश्यां कला काष्ठापि विद्यते । गृहिभिः यतिभिर्विद्धा प्यु-पोष्या धर्मकांक्षिभिः ॥ पाद्मे "एकादशी दिशाविद्धा परतो पि न वर्द्धते । यतिभिर्गृहिभिश्चैव सैवोपोष्या त्त्रये तिथिः । अत्र यतिशब्दो वर्णधर्मियतिविषयः नहि यतिमात्रस्य मुमु-क्षासंभवः प्राजापत्यं गृहस्थानां ब्राह्मं सन्यासिनां स्मृतम्' इति श्रीविष्णुपुराणे सकामयतेरपि कीर्त्तनात् गृहिशब्द-श्चापुत्रपरः पुत्रवतो दिनत्त्रयोपवासस्य निषिद्धत्वात् । नारदः 'दिन त्त्रये तु संप्राप्ते नोपोष्या दशमीयुता । य इच्छेत्पु-त्रपौत्राणांमृतोः संपदमात्मनः' मात्स्ये 'दिनत्त्रये तु सङ्क्रात्यां ग्रहणे चन्द्रसूर्ययोः । उपवासं न कुर्वीत पुत्रपौत्रसमन्वितः । पितामहः 'एकादशीदिनत्त्रये उपवासं करोति यः । तस्य

पुत्राविनश्यन्ति मखायां पिण्डदो यदि इति । एवं पुत्रवद्गृहिणे एकादशिदिनक्षये उपवासनिषेधादुपवासस्य यावज्जीवाधिकारत्वादत्र शुद्धद्वादश्यामेव तस्योपवासः पारणञ्च द्वादशीशेष इति । एवं समद्वादशिकविद्धन्यूनायां न्यूनद्वादशिकविद्धन्यूनायामपि पुत्रव्यतिरिक्तसकामानां पूर्वमेवोपवासः परत्रोपवासे पारणकालाभावात् तिथित्रयस्यातिप्रशस्तत्वेनोपवासे मुख्यतरत्वात् पारणे मुख्यकाललाभाच्चेति । विष्णुरहस्ये 'एकादशी भवेत् काचिद्दशमी दूषितातिथिः वृद्धिपक्षे भवेद्दोषः क्षयपक्षे तु पुण्यदा । एकादश्यान्तु दृश्येत दशमी घटिकापि च । द्वितीयान्हि न चाप्नोति यदा चैकादशी तिथिः । उदये तु सहस्रांशोः' तदा कार्य्या तु विद्वद्भिर्दशमीसंयुता तिथिः । तिथिक्षये तु सेनानि न वृद्धौ तु कदाचन । वृद्धौ परा तु कर्त्तव्या क्षये पूर्वान्तु कारयेत् । अत्र द्व्यपुत्रवद्गृहिणोदानं वा नक्तादिकं वा कार्य्यं नोपवासः । पाद्मे 'द्वौतिथ्यन्तावेकवारे यस्मिन्न सस्याद्दिनक्षयः । नोपोषणं गृही कुर्य्यादत्रदत्तमिहाफलम् इति गृहीप्रतीत्यर्थः । नक्ते वृद्धशातातपः 'दशम्येकादशीविद्धा द्वादशी तु क्षयङ्गता । क्षीणा सा द्वादशी

ज्ञेया नक्तं तत्र विधीयते । एवमुपवासप्रत्याम्नायस्याप्यनुष्ठाने दोषमाह व्यासः 'एकादश्यादिनत्रये उपवासी न चेद्गृही । [1]अन्नाभावेऽपि शुद्धैव सङ्कल्पाद्वा विशेषतः । धर्महानिश्च भवति सन्ततिर्नश्यति ध्रुवम् । तस्यायुः क्षीयते नित्यं संवत्सरफलं तथा इति । एवंविधन्यूनातिरेकेपि सकामस्य पूर्वमेवोपवासः निष्कामस्योत्तरत्रकेऽपि परत्रैवोपवासः । अत्र दत्तमिह फलमिति त्र्यतिथेः सकामं प्रति मुख्यतरत्वेन निष्कामस्य वेधदोषापत्तितादवस्थ्यादिति । गोभिलः 'एकादश्यां यदा ब्रह्मन् दिनत्रयतिथिर्भवेत् । तदा ह्येकादशीं त्यक्त्वा द्वादशीं समुपोषयेत् । तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणम् । एकादशी यदा ब्रह्मन् दिनत्रयतिथिर्भवेत् । समुपोष्या द्वादशी स्यात् त्रयोदश्यान्तु पारणम् । पितामहः' 'एकादश्यां यदा वत्स दिनत्रयतिथिर्भवेत् । तत्रोपोष्या द्वादशी स्यात् त्रयोदश्यान्तु पारणम्' व्यासः

---

१ एकादशीमहात्म्ये एकादशीदिने योऽन्नं भुंक्ते पापं भुनक्ति सः इह लोके स चण्डालो मृतः प्राप्नोति दुर्गतिम् । तृणमन्नं तथा वारि न भोक्तव्यं हरिर्दिने मानवैश्च कुतः कान्त भुज्यते हरिवासरे ॥

'एकादशी यदा लुप्ता परतो द्वादशी भवेत् । उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतीम्' नारदीये क्षये वाप्यथवा वृद्धौ संप्राप्ते वा दिनक्षये । उपोष्या द्वादशी पुण्या त्रयोदश्यां तु पारणम्।' कौर्मे 'दिनक्षये तु सम्प्राप्ते उपोष्या द्वादशी भवेत् । दशमीशेषसंयुक्ता न कुर्वीत कदाचन । तथा 'तिथिवृद्धौ तथा ह्रासे संप्राप्ते वा दिनक्षये। संदिग्धेषु च वाक्येषु द्वादशीं समुपोषयेत्' भविष्यत्पुराणे 'दिनक्षयेऽपि सम्प्राप्ते उपोष्या द्वादशी भवेत्। नोपोष्या दशमीयुक्ता त्रयोदश्यान्तु पारणं" ब्राह्मे 'तिथिच्छेदे तु सम्प्राप्ते द्वादशीं समुपक्रमेत् । पारयेत त्रयोदश्यां यदीच्छेच्छ्रियमात्मनः । एकादशीविशिष्टा चेद्द्वादशीं समुपोषणम्। उपोष्यश्चार्चयेद्विष्णुमुभयोरपि पक्षयोः । सुमन्तुः 'दिनक्षयेऽपि शुद्धैव [1]द्वादशी मोक्षकांक्षिभिः । उपोष्या दशमीविद्धा नोपोष्यैकादशी सदा' शारदापुराणे 'उपोष्या द्वादशी शुद्धा एकादश्यां दिनक्षये । मुमुक्षुभिर्दशाविद्धा नोपोष्यैकादशी तिथिः' भविष्यत्पुराणे 'नेत्रयवर्जिता तिथिरे-

---

[1]ब्रह्महा हेमहारी च सुरापो गुरुतल्पगः। व्रतस्यास्यकरणात्पापभुक्तो भवन्तिते एवं यः कुरुते पुण्यां द्वादशीं पापनाशिनीम् । सर्वपापविनिर्मुक्तः पदं गच्छत्यनामयम् ॥

कादशी यदि भवेत । प्रथमा तत्र नोपोष्या उपोष्याचोत्तरा भवेत् । दिनक्षये तु संप्राप्ते वरणोवासरद्वये । विशुद्धा द्वादशी राजन् समुपोष्या भवेत्सदा' सनत्कुमारः 'एकादशी पूर्वविद्धा द्वादशीसंयुता भवेत् । तत्र क्रतुशतं पुरयं त्रयोदश्यान्तु पारणम् । यत्तु 'द्विस्पृगेकादशी यत्र तत्र सन्निहितो हरिः । तामेवोपवसेत् कामं भक्तो यो विष्णुतत्परः । तत्र द्वादशीतिथित्रयविषयमेवं काम्यव्रते मुमुक्षुभिः सर्वत्र सर्ववेधस्यापि सर्वथा परित्याग एव स्वीकारनिमित्तस्य काप्यभावात् त्रयोदशी पारणस्य मुमुक्षोर्विहितत्वेन द्वादशीपारणावश्यकत्वाभावात् दिनक्षयोपवासस्य तं प्रति विहितत्वात् तदसम्भवरूपनिमित्ताभावाच्च तस्मान्मुमुक्षोस्सर्वथा वेधत्यागः प्रकारतयैव; अत एवोच्यते ब्रह्मवैवर्त्ते 'दशम्या यत्र शेषश्च एकादश्यां भवेद्यदि । सा तिथिस्सकला हेया दशमी कालमिश्रिता । गङ्गोदकस्य सम्पूर्णं यथा त्वष्टापदा भवेत् । सुराबिन्दु समायुक्तं तत्सर्वमघतां व्रजेत् । हालाहलं विषं रौद्रं कः पिवेन्मूढधी नरः । दशमीशेषसंयुक्तां क उपोष्यति सुव्रत एवं ज्ञात्वा मुनिश्रेष्ठ दशमी शेषसंयुता । वर्ज्जिता मुनिभिस्सर्वैः वासुदेवमभीप्सुभिः । लववेधेन विप्रेन्द्र दशम्येकादशीं त्यज्येत् । श्वदतौ पञ्चगव्यञ्च

दशमीं दुरतस्त्यजेत् । नारदीये ' दशमींशेषसंयुक्तां न कुर्वीत कदाचन । तिथिवृद्धौ तथाहान्यां सम्प्राप्ते दिनत्रये' ब्रह्माण्डे अरुणोदयवेलायां दशमी कलयापिच त्याज्या मुमुत्तुभिर्नित्यं सुरामिश्रोदकं यथा । दिनत्रयेऽपि संग्राह्मा द्वादशी मुनिसत्तम' सनत्कुमारः शुद्धा मुमुत्तुभिर्ग्राह्या न तु विद्धा कदाचन' भरद्वाजः ' निष्कामा यदि विद्धायामेकादश्यामुपोषणम् । कुर्य्यात् विष्णुपदं नैव प्राप्नोत्यज्ञानमोहितः' । ब्रह्मवैवर्त्ते तदेतद्दशमीशल्यं संत्याज्यं दशमीदिने । षडहं शोधयित्वातु सम्यक् चन्द्रार्ककोविदैः' इति एवं सम्यक् ज्योतिषशास्त्रज्ञैः दशमीकलामात्रस्यापि शोधनं कृत्वा त्याज्यत्वकथनात् यदा ज्योतिषशास्त्रसिद्धान्तनां परस्परविरोधेन दशमी कलाकाष्ठादिसन्देहोभवति तदा का गतिरित्यकांक्षायां वेधसन्देहे मुमुक्षुणां द्वादश्यामुपवास इत्युक्तं कौर्मे ' बहुवाक्यविरोधेन सन्देहो यदि जायते द्वादशी तु सदा ग्राह्या त्रयोदश्यान्तु पारणम् ' मार्कण्डेयः विवादेषु च सर्वेषु द्वादश्यां समुपोषणम् पारणन्तु त्रयोदश्या माज्ञेयं मासिकी मुने । हेतुवादा न कर्त्तव्या हेतुना पतते नरः' स्मृत्यर्थसारे 'बह्वागमविरोधे तु ब्राह्मणेषु विवादिषु ।

उपोष्या द्वादशी तत्र त्रयोदश्यान्तु पारणम्। ब्रह्मवैवर्त्ते 'द्वयोर्विवदतोर्यत्र द्वादशीसमुपोषयेत्। पारणं तु त्रयोदश्यामेषशास्त्रविनिश्चयः' पाद्मे 'एकादशीमुपोष्येत पक्षयोरुभयोरपि। सन्दिग्धेषु च कार्य्येषु द्वादशी समुपोषयेत्। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणम्" सङ्ग्रहे 'द्वयोर्विवदतोश्श्रुत्वा द्वादशीं समुपोषयेत्। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणम्' पुराणसङ्ग्रहे बहुनात्र किमुक्तेन सन्देहो जायते यदि। एकादशीं परित्यज्य द्वादशी समुपोषयेत्, उक्तानां मुमुक्षुविषयत्वं रुक्माङ्गदचरित्रवचनादवगम्यते 'तिथिवृद्धे तथा हान्यां संप्राप्ते वा दिनत्रये। संदिग्धेषु च कार्य्येषु द्वादशीं समुपोषयेत्। एवं वेधनिर्णयो ज्योतिश्शास्त्रसिद्धान्तविरोधेन वेधसन्देहे मुमुक्षोर्द्वादश्यामित्युक्तंभवति।

---

[१]काम्यव्रतविधिर्निरूप्यते शास्त्रकारेण दशम्यादि महीपाल त्रिदिनं परिवर्जयेत्॥ गन्धताम्बूलपुष्पादि स्त्रीसम्भोगं महायशाः दशम्यां विधिः कौर्मे॥ कांस्यं मांसं मसूरांश्च चणकान् कोरदूषकान्। शाकं मधुपरान्नं च त्यजेदुपवसन् स्त्रियम्॥ द्यूतमत्यम्बुपानं च दशम्यां वैष्णवस्त्यजेत्। तथैव द्वादश्यामपि सर्वाण्येतानि परित्याज्यानि॥

एवमेकादश्युपवासकालो निरूपितः। अथ [1]काम्यव्रते प्रधान तमस्य पारणस्य कालो निरूप्यते; तत्र पारणे सकामस्य द्वादशी नियमेन ग्राह्या। निष्कामत्वनियमेव विद्धाप्यविद्धाविज्ञेयेति तन्नियमवचनानां सकामविषयत्वात् अतस्सकामस्य द्वादश्यामेव पारणं, तस्य त्रयोदशीपारणनिषेधाच्च यानि च त्रयोदशीपारणविधायकानि तानि सर्वाणि मुमुक्षुविषयाणि , वायुपुराणे कलाप्येकादशी यत्र परतो द्वादशी न चेत्। पुण्यं क्रतुशतस्योक्तं त्रयोदश्यान्तु पारणम् इति परश्शतसामान्यवचनानाम् 'एकादश्यान्तु विद्धायां नोपवासार्चनादिकम् । द्वादश्यामेव कुर्वीत त्रयोदश्यान्तु पारणम्। शतयज्ञाधिकं पुण्यं मुक्तिरेव परं फलम्। पारणन्तु त्रयोदश्यां निष्कामानां विमुक्तिदम्। इत्यादिविशेषवचनपर्य्यवसानात्। अत्र परं फलमित्यादिना क्रतुशतपुण्यादेरानुषंगिकत्वं लभ्यते। यानि च त्रयोदश्यां विद्यमानद्वादशीस्वीकारावश्यकत्वपराणि तान्युभयपराणि 'कलाकाष्ठामुहूर्तं वा द्वादशी तु परेऽहनि द्वादशद्वादशीर्हन्ति त्रयोदश्यान्तु पारणम्। चन्द्रिकायाम् 'महाहानिकरी ह्येषा द्वादशी लंघितानृणाम्। करोति धर्महरणम् स्नातेव सरस्वती

कला । द्वन्द्वं त्रयं वापि द्वादशीन्नत्वतिक्रमेत् स्कान्दे 'एकादशी यदा वृद्धा द्वादशी लवमात्रका । द्वादश द्वादशीर्हन्ति त्रयोदश्यान्तु पारणम् ' कौर्मे ' कलाद्वयं त्रयं वापि द्वादशी न त्वतिक्रमेत् । अतिक्रान्ती द्वादशी तु हन्ति पुण्यं पुराकृतम्' भविष्यत्पुराणे ' यो द्वादशीमतिक्रम्य पारणं कुरुते नरः द्वादशाब्दव्रतं तस्य तत्क्षणादेव नश्यति' देवीरहस्ये ' द्वादशी समतिक्रम्य पारणं यः करोति हि स्नानदानादिकर्म सकलं निष्फलं तस्य सत्क्रिया । यदि किञ्चित्त्रयोदश्यां द्वादशी चोपलभ्यते ॥ द्वादश्यां पारयेत्तत्र वर्ज्जयित्वा त्रयोदशीम्' तथा ' एकादशी द्वादशी च तत्रोपोष्या क्रतोःफलं । मुहूर्तं द्वादशीं प्राप्य त्रयोदश्यां न पारणम् । एवं यत्किञ्चित् । द्वादश्यां पारणसम्भवः मध्यान्हादिनित्यकर्मलोपापत्तेरित्यत उक्तं पाद्मे ' यदा भवति स्वल्पापि द्वादशी पारणा दिने । उषःकाल द्वयं कुर्य्यात् प्रातर्मद्ध्यान्हिके तथा । यदा च कर्मानुष्ठानपारणयोः अपर्य्याप्त एव कालः तदा किं कर्त्तव्यमित्यत्रोक्तं नारदीये 'अल्पायामपि विप्रेन्द्र द्वादश्यामरुणोदये । स्नानार्चनक्रियाः कार्य्याः दानहोमादिसंयुता । त्रयोदश्यान्तु शुद्धायां पारणे पृथिवीफलं

शतयज्ञाधिकञ्चापि नरः प्राप्नोत्यसंशयम्। एतस्मात्कारणाद्विप्राः प्रत्यूषे स्नानमाचरेत्। पितृतर्पणपर्य्यन्तं स्वल्पां दृष्ट्वैव द्वादशीम्। तथा 'द्वादशी तिथिशेषापि परतश्च त्रयोदशी। तत्र क्रतुशतं पुण्यं त्रयोदश्यान्तु पारणम्' पाद्मे 'अथ वा द्वादशी न स्यात् स्वल्पापि परवशङ्गता। पारितव्यं त्रयोदश्यां महापुण्यं विवर्द्धयेत्। द्वादशी स्वल्पापरवशंगता—नित्यकर्मानुष्ठानमात्रशेषभूतेत्यर्थः। पुराणे 'त्रयोदश्यां यदा राजन् द्वादश्यास्तु कला भवेत्। सा तिथिस्सकला ज्ञेया वशिष्ठः प्राह धर्मवित्' इति। अत्राल्पापि नारदीयवचने अरुणोदय इत्यधिकरणनिर्देशकाकाक्षिन्यायेन पूर्वत्रापि सम्बद्ध्यते एकादशीनिरूपणानां स्मृतिपुराणानां तन्निरूपणप्रसक्तपूर्वापरातिथिभिस्सहैकादश्या अरुणोदयादरुणोदयपर्य्यन्तत्वविवक्षया प्रवृत्तत्वात् तत्रैकादश्या अरुणोदयोभेयावधिकत्वम् 'उदयात् प्राग्यदा विप्र मुहूर्तद्वयसंयुता। आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता' इतिवचनैः पूर्वावधिनिर्णयात् प्रथमेऽहनि संपूर्णा व्याप्ताहोरात्रमाश्रितेत्यादिभिः षष्ठिघटिकात्मकत्वावधारणात् सार्वातिथ्योभयं विधिरितिसामान्यवचनानां हरिवासरवर्जित इत्यादि-

विशेषवचनेन संकोचसिद्धौ हरिवासरवर्ज्जिता इत्याद्यरुणोदयकालस्यैकादशीशरीरत्वाभावेऽपि अरुणोदयवेधपरित्यागतात्पर्य्यकत्वमात्रमित्यर्थवर्णने सकामनिष्कामविषयनिर्णयार्थं वेधपरित्यागपरानेकविशेषवचनानां बाधापत्तेः। संपूर्णशब्दनानार्थकत्वस्य निरुक्तिसिद्धत्वेन प्रामाणिकत्वात् सूर्य्योदयवेलामारभ्यषष्ठिनाडिकेति वचनसिद्धसंपूर्णशब्दप्रवृत्तिनिमित्ते पूर्वावधिपरित्यागमात्रेणैकादशीविषयसम्पूर्णशब्दानामापवादिकत्वेन वा निर्वाहोपपत्तेः अरुणोदयाद्वितीयसूर्य्यादिवपर्य्यन्तत्वेन पुनः प्रभातसमये प्रभाते पुनरेव सेत्यादि परश्शतवचनेषु प्रभातशब्दस्य लक्षणापत्तेः सर्वतिथिसाधारणषष्ठिघटिकपरित्यागापत्तेः। समन्यूनद्वादशिकशुद्धाधिकासंभवापत्तेश्च सिद्धम्। तथा द्वादश्याप्यरुणोदययथार्थत्वं वचनादेवावगम्यते, अरुणोदय आद्या स्यात् द्वादशी स्कदिन्त अत्ये त्रयोदशी भद्रात्रिपृशासंहरेः प्रियाः अरुणोदयस्य द्वादशीशरीरत्वाद्धि तत्रैकादशीसत्त्वेन त्रिपृशेत्युच्यते एकादश्याधिक्यपरवचनेषु 'संपूर्णैकादशी यत्र प्रभाते पुनरेव सा। पुनः प्रभातसमये घटिकैकापि दृश्यते' इत्यादिष्वरुणोदयस्य द्वादशीशरीरत्वावगमाच्च द्वादश्यारुणोदयाद्विती-

ग्यसूर्य्योदयपर्य्यन्तत्वे चाधिकद्वादशीकशुद्धसमन्यूना विद्ध-समविद्धन्यूनानामसंभवापत्तिः परमवृद्धे घटिकाद्वयात्मक-कत्वेन तदधिकवृद्ध्यभावात् एवं त्रयोदश्यापि अरु-णोदयपर्य्यन्तत्वमवसियते, नारदीयवचने अरुणोद-यपर्य्यन्त इति सप्तम्यन्तपदेनैव द्वादश्यधिकरणाकांक्षपूर्ण-सूर्य्योदय इत्यध्याहारानुपपत्तेः एवं दशम्यापि अरुणोदय-पर्य्यन्तमेव विवक्षितम्, ततश्च हरिवासरवर्ज्जिता इत्यनेन हरिवासरव्रतस्वरूपकालवेधविप्रतिपत्तिप्रातिपादिकस्मृतिपुरा-णादिषु तदुपयुक्तः तिथीनामरुणोदयावधिकत्वमभिप्रेतम् निरूपणमिति व्यवसितम्, न त्वेकदिनतिथिस्वरूपमेवसर्वदा तादृशमित्येकादश्यां श्राद्धादिकर्मान्तरकालसूर्य्योदयावधिक-त्वमेव सर्वतिथिसाधारणमङ्गीकृत्य निर्णीयते यदा दर्शसंक्रा-न्तिरूपामासावधिभेदविवक्षया कालनिरूपणम् एवमेकाद-शीव्रतनिरूपणम्। दिवसानामरुणोदयावधिकत्वमभिप्रेत्य तिथिकर्मान्तराणां सूर्य्योदयावधिकत्वमभिप्रेत्य तन्निर्णयक-स्मृतिप्रवृत्तिरिति निश्चीयते, ततश्च प्रतिपत्प्रमुखा इति वच-नमुक्ताभिप्रायमेव तन्निरूपणादयो वासराणामरुणोदयो-भयावधिकत्वमभिसन्धाय प्रवृत्ता इति सिद्धम्। एकाद-

श्यधिकाद्द्वादशीविषये सूर्य्योदयानन्तरयोस्सत्येवशिष्टानामाचारदर्शनम्। तदुपदेशपक्षावलंबनिरूपणप्रवृत्तिस्तु उक्तप्रकारैवेति ॥ ७ ॥

[सकामविषये—एकादशीं दिशाविद्धां वर्द्धमाने विवर्जयेत्। क्षयमार्गस्थिते सोमे कुर्वीत दशमीयुताम् ॥ वायुपुराणे एकादशी यदि सा विद्धा द्वादशी च क्षयं गता। दशमीमिश्रिता तत्रोपोष्यामुनिसत्तमाः ॥ बृहद्वशिष्ठः— एकादशीदिशा विद्धा रात्रिशेषे त्रयोदशी । उपोष्या दशमी विद्धा मुनिरुदालकोऽब्रवीत्— अत्र निष्कामविषये व्यासः दशमीमिश्रता पूर्वा द्वादशी यदि लुप्यते । एकादश्यान्महाप्राज्ञ—उपवासः कथं भवेत् ॥ शुद्धैव द्वादशी राजन् उपोष्या मोक्षकांक्षिभिः। एकादशीदिशाविद्धा द्वादश्या हन्तिकिञ्चन। द्वादशी च त्रयोदश्यां कलाकाष्ठापि विद्यते। गृहिभिर्यतिभिर्विद्धाऽप्युपोष्या धर्मकाङ्क्षिभिः वृद्धिपक्षे भवेद्दोषः क्षयपक्षे तु पुण्यदा ॥ एकादश्यान्तु दृश्येत दशमीघटिकापि च। द्वितीयेह्नि न चाप्नोति यदा चैकादशी तिथिः ॥]

इतिश्रीमहीसारपुरवास्तव्यवाधूलकुलतिलक-

श्रीमदरणावयज्ञाराय्य्यापरनामधेयश्री-

वीरराघवसूरिविरचिते बृहत्सच्च-
रित्रपरित्राणे एकादशी-
निर्णयः समाप्तः ।

शुद्धाशुद्धपत्रम् ।

पृष्ठ	पं०	अशुद्ध	शुद्ध
३	६	ष्ट	ष्ठ
७	४	प	य
८	११	शी	शीं
११	५	द्ध	द्ध
१४	१८	पि	वि
१५	१४	त	ता
२२	१८	वे	वै
२३	१८	द्ध	द्धा
२७	२	णना	णा
२७	१४	का	क
३६	१	त	त्
३९	३	मे	ममे
४०	८	दानादिककर्मसकल	दानादिकं कर्म
४३	८	दि	द